# yudhiShThiragItA

# યુધિષ્ઠિરગીતા

## Document Information

Text title : yudhiShThiragItA

File name : yudhiShThiragiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi sunder at hotmail.com

Latest update : December 15, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

yudhiShThiragItA

# યુધિષ્ઠિરગીતા

॥ અથ યુધિષ્ઠિરગીતા ॥

### અધ્યાય ૨૯૫

જનમેજય ઉવાચ ।

એવં હૃતાયાં કૃષ્ણાયાં પ્રાપ્ય ક્લેશમનુત્તમમ્ ।
પ્રતિલભ્ય તતઃ કૃષ્ણાં કિમકુર્વન્ત પાણ્ડવાઃ ॥ ૧॥

વૈશમ્પાયન ઉવાચ ।

એવં હૃતાયાં કૃષ્ણાયાં પ્રાપ્ય ક્લેશમનુત્તમમ્ ।
વિહાય કામ્યકં રાજા સહ ભ્રાતૃભિરચ્યુતઃ ॥ ૨॥

પુનર્દ્વૈતવનં રમ્યમાજગામ યુધિષ્ઠિરઃ ।
સ્વાદુમૂલફલં રમ્યં માર્કણ્ડેયાશ્રમં પ્રતિ ॥ ૩॥

અનુગુપ્ત ફલાહારાઃ સર્વ એવ મિતાશનાઃ ।
ન્યવસન્પાણ્ડવાસ્તત્ર કૃષ્ણયા સહ ભારત ॥ ૪॥

વસન્દ્વૈતવને રાજા કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ભીમસેનોઽર્જુનશ્ચૈવ માદ્રીપુત્રૌ ચ પાણ્ડવૌ ॥ ૫॥

બ્રાહ્મણાર્થે પરાક્રાન્તા ધર્માત્માનો યતવ્રતાઃ ।
ક્લેશમાર્ચ્છન્ત વિપુલં સુખોદર્કં પરન્તપાઃ ॥ ૬॥

અજાતશત્રુમાસીનં ભ્રતૃભિઃ સહિતં વને ।
આગમ્ય બ્રાહ્મણસ્તૂર્ણં સન્તપ્ત ઇદમબ્રવીત્ ॥ ૭॥

અરણી સહિતં મહ્યં સમાસક્તં વનસ્પતૌ ।

મૃગસ્ય ઘર્ષમાણસ્ય વિષાણે સમસજ્જત ॥ ૮॥

તદાદાય ગતો રાજંસ્ત્વરમાણો મહામૃગઃ ।
આશ્રમાત્ત્વરિતઃ શીઘ્રં પ્લવમાનો મહાજવઃ ॥ ૯॥

તસ્ય ગત્વા પદં શીઘ્રમાસાદ્ય ચ મહામૃગમ્ ।
અગ્નિહોત્રં ન લુપ્યેત તદાનયત પાણ્ડવાઃ ॥ ૧૦॥

બ્રાહ્મણસ્ય વચો શ્રુત્વા સન્તપ્તોઽથ યુધિષ્ઠિરઃ ।
ધનુરાદાય કૌન્તેયઃ પ્રાદ્રવદ્ભ્રાતૃભિઃ સહ ॥ ૧૧॥

સન્નદ્ધા ધન્વિનઃ સર્વે પ્રાદ્રવન્નરપુઙ્ગવાઃ ।
બ્રાહ્મણાર્થે યતન્તસ્તે શીઘ્રમન્વગમન્મૃગમ્ ॥ ૧૨॥

કર્ણિનાલીકનારાચાનુત્સૃજન્તો મહારથાઃ ।
નાવિધ્યન્પાણ્ડવાસ્તત્ર પશ્યન્તો મૃગમન્તિકાત્ ॥ ૧૩॥

તેષાં પ્રયતમાનાનાં નાદૃશ્યત મહામૃગઃ ।
અપશ્યન્તો મૃગં શ્રાન્તા દુઃખં પ્રાપ્તા મનસ્વિનઃ ॥ ૧૪॥

શીતલછાયમાસાદ્ય ન્યગ્રોધં ગહને વને ।
ક્ષુત્પિપાસાપરીતાઙ્ગાઃ પાણ્ડવાઃ સમુપાવિશન્ ॥ ૧૫॥

તેષાં સમુપવિષ્ટાનાં નકુલો દુઃખિતસ્તદા ।
અબ્રવીદ્ભ્રાતરં જ્યેષ્ઠમમર્ષાત્કુરુસત્તમ ॥ ૧૬॥

નાસ્મિન્કુલે જાતુ મમજ્જ ધર્મો
ન ચાલસ્યાદર્થલોપો બભૂવ ।
અનુત્તરાઃ સર્વભૂતેષુ ભૂયઃ
સમ્પ્રાપ્તાઃ સ્મઃ સંશયં કેન રાજન્ ॥ ૧૭॥

---

## ૨૯૬

યુધિષ્ઠિર ઉવાચ ।

નાપદામસ્તિ મર્યાદા ન નિમિત્તં ન કારણમ્ ।
ધર્મસ્તુ વિભજત્યત્ર ઉભયોઃ પુણ્યપાપયોઃ ॥ ૧॥

ભીમ ઉવાચ ।

પ્રાતિકામ્યનયત્કૃષ્ણાં સભાયાં પ્રેષ્યવત્તદા ।
ન મયા નિહતસ્તત્ર તેન પ્રાપ્તાઃ સ્મ સંશયમ્ ॥ ૨॥

અર્જુન ઉવાચ ।

વાચસ્તીક્ષ્ણાસ્થિ ભેદિન્યઃ સૂતપુત્રેણ ભાષિતાઃ ।
અતિતીક્ષ્ણા મયા ક્ષાન્તાસ્તેન પ્રાપ્તઃ સ્મ સંશયમ્ ॥ ૩॥

સહદેવ ઉવાચ ।

શકુનિસ્ત્વાં યદાજૈષીદક્ષદ્યૂતેન ભારત ।
સ મયા ન હતસ્તત્ર તેન પ્રાપ્તાઃ સ્મ સંશયમ્ ॥ ૪॥

વૈશમ્પાયન ઉવાચ ।

તતો યુધિષ્ઠિરો રાજા નકુલં વાક્યમબ્રવીત્ ।
આરુહ્ય વૃક્ષં માદ્રેય નિરીક્ષસ્વ દિશો દશ ॥ ૫॥

પાનીયમન્તિકે પશ્ય વૃક્ષાન્વાપ્યુદકાશ્રયાન્ ।
ઇમે હિ ભ્રાતરઃ શ્રાન્તાસ્તવ તાત પિપાસિતાઃ ॥ ૬॥

નકુલસ્તુ તથેત્યુક્ત્વા શીઘ્રમારુહ્ય પાદમમ્ ।
અબ્રવીદ્ભ્રાતરં જ્યેષ્ઠમભિવીક્ષ્ય સમન્તતઃ ॥ ૭॥

પશ્યામિ બહુલાન્રાજન્વૃક્ષાનુદકસંશ્રયાન્ ।
સારસાનાં ચ નિર્હ્રાદમત્રોદકમસંશયમ્ ॥ ૮॥

તતોઽબ્રવીત્સત્યધૃતિઃ કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ગચ્છ સૌમ્ય તતઃ શીઘ્રં તૂર્ણં પાનીયમાનય ॥ ૯॥

નકુલસ્તુ તથેત્યુક્ત્વા ભ્રાતુર્જ્યેષ્ઠસ્ય શાસનાત્ ।
પ્રાદ્રવદ્યત્ર પાનીયં શીઘ્રં ચૈવાન્વપદ્યત ॥ ૧૦॥

સ દૃષ્ટ્વા વિમલં તોયં સારસૈઃ પરિવારિતમ્ ।
પાતુ કાકસ્તતો વાચમન્તરિક્ષાત્સ શુશ્રુવે ॥ ૧૧॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ માદ્રેય તતઃ પિબ હરસ્વ ચ ॥ ૧૨॥

અનાદૃત્ય તુ તદ્વાક્યં નકુલઃ સુપિપાસિતઃ ।

અપિબચ્છીતલં તોયં પીત્વા ચ નિપપાત હ ॥ ૧૩॥

ચિરાયમાણે નકુલે કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
અબ્રવીદ્ભ્રાતરં વીરં સહદેવમરિન્દમમ્ ॥ ૧૪॥

ભ્રાતા ચિરાયતે તાત સહદેવ તવાગ્રજઃ ।
તં ચૈવાનય સોદર્યં પાનીયં ચ ત્વમાનય ॥ ૧૫॥

સહદેવસ્તથેત્યુક્ત્વા તાં દિશં પ્રત્યપદ્યત ।
દદર્શ ચ હતં ભૂમૌ ભ્રાતરં નકુલં તદા ॥ ૧૬॥

ભ્રાતૃશોકાભિસન્તપ્તસ્તૃષયા ચ પ્રપીડિતઃ ।
અભિદુદ્રાવ પાનીયં તતો વાગભ્યભાષત ॥ ૧૭॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા યથાકામં તતઃ પિબ હરસ્વ ચ ॥ ૧૮॥

અનાદૃત્ય તુ તદ્વાક્યં સહદેવઃ પિપાસિતઃ ।
અપિબચ્છીતલં તોયં પીત્વા ચ નિપપાત હ ॥ ૧૯॥

અથાબ્રવીત્સ વિજયં કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ભ્રાતરૌ તે ચિરગતૌ બીભત્સો શત્રુકર્શન ।
તૌ ચૈવાનય ભદ્રં તે પાનીયં ચ ત્વમાનય ॥ ૨૦॥

એવમુક્તો ગુડાકેશઃ પ્રગૃહ્ય સશરં ધનુઃ ।
આમુક્તખડ્ગો મેધાવી તત્સરો પ્રત્યપદ્યત ॥ ૨૧॥

યતઃ પુરુષશાર્દૂલૌ પાનીય હરણે ગતુ ।
તૌ દદર્શ હતૌ તત્ર ભ્રાતરૌ શ્વેતવાહનઃ ॥ ૨૨॥

પ્રસુપ્તાવિવ તૌ દૃષ્ટ્વા નરસિંહઃ સુદુઃખિતઃ ।
ધનુરુદ્યમ્ય કૌન્તેયો વ્યલોકયત તદ્વનમ્ ॥ ૨૩॥

નાપશ્યત્તત્ર કિં ચિત્સ ભૂતં તસ્મિન્મહાવને ।
સવ્યસાચી તતઃ શ્રાન્તઃ પાનીયં સોઽભ્યધાવત ॥ ૨૪॥

અભિધાવંસ્તતો વાચમન્તરિક્ષાત્સ શુશ્રુવે ।
કિમાસીદસિ પાનીયં નૈતચ્છક્યં બલાત્ત્વયા ॥ ૨૫॥

કૌન્તેય યદિ વૈશમ્પાયન ઉવાચ । પ્રશ્નાન્મયોક્તાન્પ્રતિપત્સ્યસે ।
તતઃ પાસ્યસિ પાનીયં હરિષ્યસિ ચ ભારત ॥ ૨૬॥

વારિતસ્ત્વબ્રવીત્પાર્થો દૃશ્યમાનો નિવારય ।
યાવદ્બાણૈર્વિનિર્ભિન્નઃ પુનર્નૈવં વદિષ્યસિ ॥ ૨૭॥

એવમુક્ત્વા તતઃ પાર્થઃ શરૈરસ્ત્રાનુમન્ત્રિતૈઃ ।
વવર્ષ તાં દિશં કૃત્સ્નાં શબ્દવેધં ચ દર્શયન્ ॥ ૨૮॥

કર્ણિનાલીકનારાચાનુત્સૃજન્ભરતર્ષભ ।
અનેકૈરિષુસઙ્ઘાતૈરન્તરિક્ષં વવર્ષ હ ॥ ૨૯॥

યક્ષ ઉવાચ ।

કિં વિઘાતેન તે પાર્થ પ્રશ્નાનુક્ત્વા તતઃ પિબ ।
અનુક્ત્વા તુ તતઃ પ્રશ્નાન્પીત્વૈવ ન ભવિષ્યસિ ॥ ૩૦॥

વૈશમ્પાયન ઉવાચ ।

સ ત્વમોઘાનિષૂન્મુક્ત્વા તૃષ્ણયાભિપ્રપીડિતઃ ।
અવિજ્ઞાયૈવ તાન્પ્રશ્નાન્પીત્વૈવ નિપપાત હ ॥ ૩૧॥

અથાબ્રવીદ્ભીમસેનં કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
નકુલઃ સહદેવશ્ચ બીભત્સુશ્ચાપરાજિતઃ ॥ ૩૨॥

ચિરં ગતાસ્તોયહેતોર્ન ચાગચ્છન્તિ ભારત ।
તાંશ્ચૈવાનય ભદ્રં તે પાનીયં ચ ત્વમાનય ॥ ૩૩॥

ભીમસેનસ્તથેત્યુક્ત્વા તાં દિશં પત્યપદ્યત ।
યત્ર તે પુરુષવ્યાઘ્રા ભ્રાતરોઽસ્ય નિપાતિતાઃ ॥ ૩૪॥

તાન્દૃષ્ટ્વા દુઃખિતો ભીમસ્તૃષયા ચ પ્રપીડિતઃ ।
અમન્યત મહાબાહુઃ કર્મ તદ્યક્ષરક્ષસામ્ ।
સ ચિન્તયામાસ તદા યોદ્ધવ્યં ધ્રુવમદ્ય મે ॥ ૩૫॥

પાસ્યામિ તાવત્પાનીયમિતિ પાર્થો વૃકોદરઃ ।
તતોઽભ્યધાવત્પાનીયં પિપાસુઃ પુરુષર્ષભઃ ॥ ૩૬॥

યક્ષ ઉવાચ ।

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૩૭॥

વૈશમ્પાયન ઉવાચ ।

એવમુક્તસ્તતો ભીમો યક્ષેણામિત તેજસા ।
અવિજ્ઞાયૈવ તાન્પ્રશ્નાન્પીત્વૈવ નિપપાત હ ॥ ૩૮॥

તતઃ કુન્તીસુતો રાજા વિચિન્ત્ય પુરુષર્ષભઃ ।
સમુત્થાય મહાબાહુર્દહ્યમાનેન ચેતસા ॥ ૩૯॥

અપેતજનનિર્ઘોષં પ્રવિવેશ મહાવનમ્ ।
રુરુભિશ્ચ વરાહૈશ્ચ પક્ષિભિશ્ચ નિષેવિતમ્ ॥ ૪૦॥

નીલભાસ્વરવર્ણૈશ્ચ પાદપૈરુપશોભિતમ્ ।
ભ્રમરૈરુપગીતં ચ પક્ષિભિશ્ચ મહાયશઃ ॥ ૪૧॥

સ ગચ્છન્કાનને તસ્મિન્હેમજાલપરિષ્કૃતમ્ ।
દદર્શ તત્સરો શ્રીમાન્વિશ્વકર્મ કૃતં યથા ॥ ૪૨॥

ઉપેતં નલિની જાલૈઃ સિન્ધુવારૈશ્ચ વેતસૈઃ ।
કેતકૈઃ કરવીરૈશ્ચ પિપ્પલૈશ્ચૈવ સંવૃતમ્ ।
શ્રમાર્તસ્તદુપાગમ્ય સરો દૃષ્ટ્વાથ વિસ્મિતઃ ॥ ૪૩॥

---

૨૯૭

વૈશમ્પાયન ઉવાચ ।

સ દદર્શ હતાન્ભ્રાતૄંલ્લોકપાલાનિવ ચ્યુતાન્ ।
યુગાન્તે સમનુપ્રાપ્તે શક્ર પ્રતિમગૌરવાન્ ॥ ૧॥

વિપ્રકીર્ણધનુર્બાણં દૃષ્ટ્વા નિહતમર્જુનમ્ ।
ભીમસેનં યમૌ ચોભૌ નિર્વિચેષ્ટાન્ગતાયુરઃ ॥ ૨॥

સ દીર્ઘમુષ્ણં નિઃશ્વસ્ય શોકબાષ્પપરિપ્લુતઃ ।
બુદ્ધ્યા વિચિન્તયામાસ વીરાઃ કેન નિપાતિતાઃ ॥ ૩॥

નૈષાં શસ્ત્રપ્રહારોઽસ્તિ પદં નેહાસ્તિ કસ્ય ચિત્ ।
ભૂતં મહદિદં મન્યે ભ્રાતરો યેન મે હતાઃ ।
એકાગ્રં ચિન્તયિષ્યામિ પીત્વા વેત્સ્યામિ વા જલમ્ ॥ ૪॥

સ્યાત્તુ દુર્યોધનેનેદમુપાંશુ વિહિતં કૃતમ્ ।
ગન્ધાર રાજરચિતં સતતં જિહ્મબુદ્ધિના ॥ ૫॥

યસ્ય કાર્યમકાર્યં વા સમમેવ ભવત્યુત ।
કસ્તસ્ય વિશ્વસેદ્વીરો દુર્મતેરકૃતાત્મનઃ ॥ ૬॥

અથ વા પુરુષૈર્ગૂઢૈઃ પ્રયોગોઽયં દુરાત્મનઃ ।
ભવેદિતિ મહાબાહુર્બહુધા સમચિન્તયત્ ॥ ૭॥

તસ્યાસીન્ન વિષેણેદમુદકં દૂષિતં યથા ।
મુખવર્ણાઃ પ્રસન્ના મે ભ્રાતૃણાં ઇત્યચિન્તયત્ ॥ ૮॥

એકૈકશશ્ચૌઘબલાનિમાન્પુરુષસત્તમાન્ ।
કોઽન્યઃ પ્રતિસમાસેત કાલાન્તકયમાદૃતે ॥ ૯॥

એતેનાધ્યવસાયેન તત્તોયમવગાઢવાન્ ।
ગાહમાનશ્ચ તત્તોયમન્તરિક્ષાત્સ શુશ્રુવે ॥ ૧૦॥

યક્ષ ઉવાચ ।

અહં બકઃ શૈવલમત્સ્યભક્ષો
મયા નીતાઃ પ્રેતવશં તવાનુજાઃ ।
ત્વં પઞ્ચમો ભવિતા રાજપુત્ર
ન ચેત્પ્રશ્નાન્પૃચ્છતો વ્યાકરોષિ ॥ ૧૧॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૧૨॥

યુધિષ્ઠિર ઉવાચ ।

રુદ્રાણાં વા વસૂનાં વા મરુતાં વા પ્રધાનભાક્ ।
પૃચ્છામિ કો ભવાન્દેવો નૈતચ્છકુનિના કૃતમ્ ॥ ૧૩॥

હિમવાન્પારિયાત્રશ્ ચ વિન્ધ્યો મલય એવ ચ ।
ચત્વારઃ પર્વતાઃ કેન પાતિતા ભુવિ તેજસા ॥ ૧૪॥

અતીવ તે મહત્કર્મકૃતં બલવતાં વર ।
યન્ન દેવા ન ગન્ધર્વા નાસુરા ન ચ રાક્ષસાઃ ।
વિષહેરન્મહાયુદ્ધે કૃતં તે તન્મહાદ્ભુતમ્ ॥ ૧૫॥

ન તે જાનામિ યત્કાર્યં નાભિજાનામિ કાઙ્ક્ષિતમ્ ।

કૌતૂહલં મહજ્જાતં સાધ્વસં ચાગતં મમ ॥ ૧૬॥

યેનાસ્મ્યુદ્વિગ્નહૃદયઃ સમુત્પન્ન શિરો જ્વરઃ ।
પૃચ્છામિ ભગવંસ્તસ્માત્કો ભવાનિહ તિષ્ઠતિ ॥ ૧૭॥

યક્ષ ઉવાચ ।

યક્ષોઽહમસ્મિ ભદ્રં તે નાસ્મિ પક્ષી જલે ચરઃ ।
મયૈતે નિહતાઃ સર્વે ભ્રાતરસ્તે મહૌજસઃ ॥ ૧૮॥

વૈશમ્પાયન ઉવાચ ।

તતસ્તામશિવાં શ્રુત્વા વાચં સ પરુષાક્ષરામ્ ।
યક્ષસ્ય બ્રુવતો રાજન્નુપક્રમ્ય તદા સ્થિતઃ ॥ ૧૯॥

વિરૂપાક્ષં મહાકાયં યક્ષં તાલસમુચ્છ્રયમ્ ।
જ્વલનાર્કપ્રતીકાશમધૃષ્યં પર્વતોપમમ્ ॥ ૨૦॥

સેતુમાશ્રિત્ય તિષ્ઠન્તં દદર્શ ભરતર્ષભઃ ।
મેઘગમ્ભીરયા વાચા તર્જયન્તં મહાબલમ્ ॥ ૨૧॥

યક્ષ ઉવાચ ।

ઇમે તે ભ્રાતરો રાજન્વાર્યમાણા મયાસકૃત્ ।
બલાત્તોયં જિહીર્ષન્તસ્તતો વૈશમ્પાયન ઉવાચ । સૂદિતા મયા ॥ ૨૨॥

ન પેયમુદકં રાજન્પ્રાણાનિહ પરીપ્સતા ।
પાર્થ મા સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૨૩॥

યુધિષ્ઠિર ઉવાચ ।

નૈવાહં કામયે યક્ષ તવ પૂર્વપરિગ્રહમ્ ।
કામનૈતત્પ્રશંસન્તિ સન્તો હિ પુરુષાઃ સદા ॥ ૨૪॥

યદાત્મના સ્વમાત્માનં પ્રશંસેત્પુરુષઃ પ્રભો ।
યથા પ્રજ્ઞં તુ તે પ્રશ્નાન્પ્રતિવક્ષ્યામિ પૃચ્છ મામ્ ॥ ૨૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદાદિત્યમુન્નયતિ કેચ તસ્યાભિતશ્ચરાઃ ।
કશ્ચૈનમસ્તં નયતિ કસ્મિંશ્ચ પ્રતિતિષ્ઠતિ ॥ ૨૬॥

યુધિષ્ઠિર ઉવાચ ।

બ્રહ્માદિત્યમુન્નયતિ દેવાસ્તસ્યાભિતશ્ચરાઃ ।
ધર્મશ્ચાસ્તં નયતિ ચ સત્યે ચ પ્રતિતિષ્ઠતિ ॥ ૨૭॥

યક્ષ ઉવાચ ।

કેન સ્વિચ્છ્રોત્રિયો ભવતિ કેન સ્વિદ્વિન્દતે મહત્ ।
કેન દ્વિતીયવાન્ભવતિ રાજન્કેન ચ બુદ્ધિમાન્ ॥ ૨૮॥

યુધિષ્ઠિર ઉવાચ ।

શ્રુતેન શ્રોત્રિયો ભવતિ તપસા વિન્દતે મહત્ ।
ધૃત્યા દ્વિતીયવાન્ભવતિ બુદ્ધિમાન્વૃદ્ધસેવયા ॥ ૨૯॥

યક્ષ ઉવાચ ।

કિં બ્રાહ્મણાનાં દેવત્વં કશ્ચ ધર્મઃ સતાં ઇવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતાં ઇવ ॥ ૩૦॥

યુધિષ્ઠિર ઉવાચ ।

સ્વાધ્યાય એષાં દેવત્વં તપ એષાં સતાં ઇવ ।
મરણં માનુષો ભાવઃ પરિવાદોઽસતાં ઇવ ॥ ૩૧॥

યક્ષ ઉવાચ ।

કિં ક્ષત્રિયાણાં દેવત્વં કશ્ચ ધર્મઃ સતાં ઇવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતાં ઇવ ॥ ૩૨॥

યુધિષ્ઠિર ઉવાચ ।

ઇષ્વસ્ત્રમેષાં દેવત્વં યજ્ઞ એષાં સતાં ઇવ ।
ભયં વૈશમ્પાયન ઉવાચ । માનુષો ભાવઃ પરિત્યાગોઽસતાં ઇવ ॥ ૩૩॥

યક્ષ ઉવાચ ।

કિમેકં યજ્ઞિયં સામ કિમેકં યજ્ઞિયં યજુઃ ।
કા ચૈકા વૃશ્ચતે યજ્ઞં કાં યજ્ઞો નાતિવર્તતે ॥ ૩૪॥

યુધિષ્ઠિર ઉવાચ ।

પ્રાણો વૈશમ્પાયન ઉવાચ । યજ્ઞિયં સામ મનો વૈ યજ્ઞિયં યજુઃ ।

વાગેકા વૃશ્વતે યજ્ઞં તાં યજ્ઞો નાતિવર્તતે ॥ ૩૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદાપતતાં શ્રેષ્ઠં બીજં નિપતતાં વરમ્ ।
કિં સ્વિત્પ્રતિષ્ઠમાનાનાં કિં સ્વિત્પ્રવદતાં વરમ્ ॥ ૩૬॥

યુધિષ્ઠિર ઉવાચ ।

વર્ષમાપતતાં શ્રેષ્ઠં બીજં નિપતતાં વરમ્ ।
ગાવઃ પ્રતિષ્ઠમાનાનાં પુત્રઃ પ્રવદતાં વરઃ ॥ ૩૭॥

યક્ષ ઉવાચ ।

ઇન્દ્રિયાર્થાનનુભવન્બુદ્ધિમાઁલ્લોકપૂજિતઃ ।
સંમતઃ સર્વભૂતાનામુચ્છ્વસન્કો ન જીવતિ ॥ ૩૮॥

યુધિષ્ઠિર ઉવાચ ।

દેવતાતિથિભૃત્યાનાં પિતૃણામાત્મનશ્ચ યઃ ।
ન નિર્વપતિ પઞ્ચાનામુચ્છ્વસન્ન સ જીવતિ ॥ ૩૯॥

યક્ષ ઉવાચ ।

કિં સ્વિદ્ગુરુતરં ભૂમેઃ કિં સ્વિદુચ્ચતરં ચ ખાત્ ।
કિં સ્વિચ્છીઘ્રતરં વાયોઃ કિં સ્વિદ્બહુતરં નૃણામ્ ॥ ૪૦॥

યુધિષ્ઠિર ઉવાચ ।

માતા ગુરુતરા ભૂમેઃ પિતા ઉચ્ચતરશ્ચ ખાત્ ।
મનો શીઘ્રતરં વાયોશ્ચિન્તા બહુતરી નૃણામ્ ॥ ૪૧॥

યક્ષ ઉવાચ ।

કિં સ્વિત્સુપ્તં ન નિમિષતિ કિં સ્વિજ્જાતં ન ચોપતિ ।
કસ્ય સ્વિદ્ધૃદયં નાસ્તિ કિં સ્વિદ્વેગેન વર્ધતે ॥ ૪૨॥

યુધિષ્ઠિર ઉવાચ ।

મત્સ્યઃ સુપ્તો ન નિમિષત્યણ્ડં જાતં ન ચોપતિ ।
અશ્મનો હૃદયં નાસ્તિ નદીવેગેન વર્ધતે ॥ ૪૩॥

યક્ષ ઉવાચ ।

કિં સ્વિત્પ્રવસતો મિત્રં કિં સ્વિન્મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ચ કિં મિત્રં કિં સ્વિન્મિત્રં મરિષ્યતઃ ॥ ૪૪॥

યુધિષ્ઠિર ઉવાચ ।

સાર્થઃ પ્રવસતો મિત્રં ભાર્યા મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ભિષન્મિત્રં દાનં મિત્રં મરિષ્યતઃ ॥ ૪૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદેકો વિચરતિ જાતઃ કો જાયતે પુનઃ ।
કિં સ્વિદ્ધિમસ્ય ભૈષજ્યં કિં સ્વિદાવપનં મહત્ ॥ ૪૬॥

યુધિષ્ઠિર ઉવાચ ।

સૂર્ય એકો વિચરતિ ચન્દ્રમા જાયતે પુનઃ ।
અગ્નિર્હિમસ્ય ભૈષજ્યં ભૂમિરાપવનં મહત્ ॥ ૪૭॥

યક્ષ ઉવાચ ।

કિં સ્વિદેકપદં ધર્મ્યં કિં સ્વિદેકપદં યશઃ ।
કિં સ્વિદેકપદં સ્વર્ગ્યં કિં સ્વિદેકપદં સુખમ્ ॥ ૪૮॥

યુધિષ્ઠિર ઉવાચ ।

દાક્ષ્યમેકપદં ધર્મ્યં દાનમેકપદં યશઃ ।
સત્યમેકપદં સ્વર્ગ્યં શીલમેકપદં સુખમ્ ॥ ૪૯॥

યક્ષ ઉવાચ ।

કિં સ્વિદાત્મા મનુષ્યસ્ય કિં સ્વિદ્દૈવકૃતઃ સખા ।
ઉપજીવનં કિં સ્વિદસ્ય કિં સ્વિદસ્ય પરાયણમ્ ॥ ૫૦॥

યુધિષ્ઠિર ઉવાચ ।

પુત્ર આત્મા મનુષ્યસ્ય ભાર્યા દૈવકૃતઃ સખા ।
ઉપજીવનં ચ પર્જન્યો દાનમસ્ય પરાયણમ્ ॥ ૫૧॥

યક્ષ ઉવાચ ।

ધન્યાનામુત્તમં કિં સ્વિદ્ધનાનાં કિં સ્વિદુત્તમમ્ ।
લાભાનામુત્તમં કિં સ્વિત્કિં સુખાનાં તથોત્તમમ્ ॥ ૫૨॥

યુધિષ્ઠિર ઉવાચ ।

ધન્યાનામુત્તમં દાક્ષ્યં ધનાનામુત્તમં શ્રુતમ્ ।
લાભાનાં શ્રેષ્ઠમારોગ્યં સુખાનાં તુષ્ટિરુત્તમા ॥ ૫૩॥

યક્ષ ઉવાચ ।

કશ્ચ ધર્મઃ પરો લોકે કશ્ચ ધર્મઃ સદા ફલઃ ।
કિં નિયમ્ય ન શોચન્તિ કૈશ્ચ સન્ધિર્ન જીર્યતે ॥ ૫૪॥

યુધિષ્ઠિર ઉવાચ ।

આનૃશંસ્યં પરો ધર્મસ્ત્રયીધર્મઃ સદા ફલઃ ।
અનો યમ્ય ન શોચન્તિ સદ્ભિઃ સન્ધિર્ન જીર્યતે ॥ ૫૫॥

યક્ષ ઉવાચ ।

કિં નુ હિત્વા પ્રિયો ભવતિ કિં નુ હિત્વા ન શોચતિ ।
કિં નુ હિત્વાર્થવાન્ભવતિ કિં નુ હિત્વા સુખી ભવેત્ ॥ ૫૬॥

યુધિષ્ઠિર ઉવાચ ।

માનં હિત્વા પ્રિયો ભવતિ ક્રોધં હિત્વા ન શોચતિ ।
કામં હિત્વાર્થવાન્ભવતિ લોભં હિત્વા સુખૂ ભવેત્ ॥ ૫૭॥

યક્ષ ઉવાચ ।

મૃતં કથં સ્યાત્પુરુષઃ કથં રાષ્ટ્રં મૃતં ભવેત્ ।
શ્રાધં મૃતં કથં ચ સ્યાત્કથં યજ્ઞો મૃતો ભવેત્ ॥ ૫૮॥

યુધિષ્ઠિર ઉવાચ ।

મૃતો દરિદ્રઃ પુરુષો મૃતં રાષ્ટ્રમરાજકમ્ ।
મૃતમશ્રોત્રિયં શ્રાદ્ધં મૃતો યજ્ઞો ત્વદક્ષિણઃ ॥ ૫૯॥

યક્ષ ઉવાચ ।

કા દિક્કિમુદકં પ્રોક્તં કિમન્નં પાર્થ કિં વિષમ્ ।
શ્રાદ્ધસ્ય કાલમાખ્યાહિ તતઃ પિબ હરસ્વ ચ ॥ ૬૦॥

યુધિષ્ઠિર ઉવાચ ।

સન્તો દિગ્જલમાકાશં ગૌરન્નં પ્રાર્થના વિષમ્ ।

શ્રાદ્ધસ્ય બ્રાહ્મણઃ કાલઃ કથં વા યક્ષ મન્યસે ॥ ૬૧॥

યક્ષ ઉવાચ ।

વ્યાખ્યાતા મે ત્વયા પ્રશ્ના યાથાતથ્યં પરન્તપ ।
પુરુષં ત્વિદાનીમાખ્યાહિ યશ્ચ સર્વધની નરઃ ॥ ૬૨॥

યુધિષ્ઠિર ઉવાચ ।

દિવં સ્પૃશતિ ભૂમિં ચ શબ્દઃ પુણ્યસ્ય કર્મણઃ ।
યાવત્સ શબ્દો ભવતિ તાવત્પુરુષ ઉચ્યતે ॥ ૬૩॥

તુલ્યે પ્રિયાપ્રિયે યસ્ય સુખદુઃખે તથૈવ ચ ।
અતીતાનાગતે ચોભે સ વૈશમ્પાયન ઉવાચ । સર્વધની નરઃ ॥ ૬૪॥

યક્ષ ઉવાચ ।

વ્યાખ્યાતઃ પુરુષો રાજન્યશ્ચ સર્વધની નરઃ ।
તસ્માત્તવૈકો ભ્રાતૃણાં યમિચ્છસિ સ જીવતુ ॥ ૬૫॥

યુધિષ્ઠિર ઉવાચ ।

શ્યામો ય એષ રક્તાક્ષો બૃહચ્છાલ ઇવોદ્ગતઃ ।
વ્યૂઢોરસ્કો મહાબાહુરકુલો યક્ષ જીવતુ ॥ ૬૬॥

યક્ષ ઉવાચ ।

પ્રિયસ્તે ભીમસેનોઽયમર્જુનો વઃ પરાયણમ્ ।
સ કસ્માન્નકુલં રાજન્સાપત્નં જીવમિચ્છસિ ॥ ૬૭॥

યસ્ય નાગસહસ્રેણ દશ સઙ્ખ્યેન વૈશમ્પાયન ઉવાચ । બલમ્ ।
તુલ્યં તં ભીમમુત્સૃજ્ય નકુલં જીવમિચ્છસિ ॥ ૬૮॥

તથૈનં મનુજાઃ પ્રાહુર્ભીમસેનં પ્રિયં તવ ।
અથ કેનાનુભાવેન સાપત્નં જીવમિચ્છસિ ॥ ૬૯॥

યસ્ય બાહુબલં સર્વે પાણ્ડવાઃ સમુપાશ્રિતાઃ ।
અર્જુનં તમપાહાય નકુલં જીવમિચ્છસિ ॥ ૭૦॥

યુધિષ્ઠિર ઉવાચ ।

આનૃશંસ્ય પરો ધર્મઃ પરમાર્થાચ્ચ મે મતમ્ ।
આનૃશંસ્યં ચિકીર્ષામિ નકુલો યક્ષ જીવતુ ॥ ૭૧॥

ધર્મશીલઃ સદા રાજા ઇતિ માં માનવા વિદુઃ ।
સ્વધર્માન્ન ચલિષ્યામિ નકુલો યક્ષ જીવતુ ॥ ૭૨॥

યથા કુન્તી તથા માદ્રી વિશેષો નાસ્તિ મે તયોઃ ।
માતૃભ્યાં સમમિચ્છામિ નકુલો યક્ષ જીવતુ ॥ ૭૩॥

યક્ષ ઉવાચ ।

યસ્ય તેઽર્થાચ્ચ કામાચ્ચ આનૃશંસ્યં પરં મતમ્ ।
અસ્માત્તે ભ્રાતરઃ સર્વે જીવન્તુ ભરતર્ષભ ॥ ૭૪॥

---

## ૨૯૮

વૈશમ્પાયન ઉવાચ ।

તતસ્તે યક્ષવચનાદુદતિષ્ઠન્ત પાણ્ડવાઃ ।
ક્ષુત્પિપાસે ચ સર્વેષાં ક્ષણે તસ્મિન્વ્યગચ્છતામ્ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ ।

રસસ્યેકેન પાદેન તિષ્ઠન્તમપરાજિતમ્ ।
પૃચ્છામિ કો ભવાન્દેવો ન મે યક્ષો મતો ભવાન્ ॥ ૨॥

વસૂનાં વા ભવાનેકો રુદ્રાણામથ વા ભવાન્ ।
અથ વા મરુતાં શ્રેષ્ઠો વજ્રી વા ત્રિદશેશ્વરઃ ॥ ૩॥

મમ હિ ભ્રાતર ઇમે સહસ્રશતયોધિનઃ ।
ન તં યોગં પ્રપશ્યામિ યેન સ્યુર્વિનિપાતિતાઃ ॥ ૪॥

સુખં પ્રતિવિબુદ્ધાનામિન્દ્રિયાણ્યુપલક્ષયે ।
સ ભવાન્સુહૃદસ્માકમથ વા નઃ પિતા ભવાન્ ॥ ૫॥

યક્ષ ઉવાચ ।

અહં તે જનકસ્તાત ધર્મો મૃદુ પરાક્રમ ।
ત્વાં દિદૃક્ષુરનુપ્રાપ્તો વિદ્ધિ માં ભરતર્ષભ ॥ ૬॥

યશો સત્યં દમઃ શૌચમાર્જવં હ્રીરચાપલમ્ ।

દાનં તપો બ્રહ્મચર્યમિત્યેતાસ્તનવો મમ ॥ ૭॥

અહિંસા સમતા શાન્તિસ્તપો શૌચમમત્સરઃ ।
દ્વારાણ્યેતાનિ મે વિદ્ધિ પ્રિયો હ્યસિ સદા મમ ॥ ૮॥

દિષ્ટ્યા પઞ્ચસુ રક્તોઽસિ દિષ્ટ્યા તે ષટ્પદી જિતા ।
દ્વે પૂર્વે મધ્યમે દ્વે ચ દ્વે ચાન્તે સામ્પરાયિકે ॥ ૯॥

ધર્મોઽહમસ્મિ ભદ્રં તે જિજ્ઞાસુસ્ત્વમિહાગતઃ ।
આનૃશંસ્યેન તુષ્ટોઽસ્મિ વરં દાસ્યામિ તેઽનઘ ॥ ૧૦॥

વરં વૃણીષ્વ રાજેન્દ્ર દાતા હ્યસ્મિ તવાનઘ ।
યે હિ મે પુરુષા ભક્તા ન તેષામસ્તિ દુર્ગતિઃ ॥ ૧૧॥

યુધિષ્ઠિર ઉવાચ ।

અરણી સહિતં યસ્ય મૃગ આદાય ગચ્છતિ ।
તસ્યાગ્નયો ન લુપ્યેરન્પ્રથમોઽસ્તુ વરો મમ ॥ ૧૨॥

ધર્મ ઉવાચ ।

અરણી સહિતં તસ્ય બ્રાહ્મણસ્ય હૃતં મયા ।
મૃગવેષેણ કૌન્તેય જિજ્ઞાસાર્થં તવ પ્રભો ॥ ૧૩॥

વૈશમ્પાયન ઉવાચ ।

દદાનીત્યેવ ભવગાનુત્તરં પ્રત્યપદ્યત ।
અન્યં વરય ભદ્રં તે વરં ત્વમમરોપમ ॥ ૧૪॥

યુધિષ્ઠિર ઉવાચ ।

વર્ષાણિ દ્વાદશારણ્યે ત્રયોદશમુપસ્થિતમ્ ।
તત્ર નો નાભિજાનીયુર્વસતો મનુજાઃ ક્વ ચિત્ ॥ ૧૫॥

વૈશમ્પાયન ઉવાચ ।

દદાનીત્યેવ ભગવાનુત્તરં પ્રત્યપદ્યત ।
ભૂયો ચાશ્વાસયામાસ કૌન્તેયં સત્યવિક્રમમ્ ॥ ૧૬॥

યદ્યપિ સ્વેન રૂપેણ ચરિષ્યથ મહીમિમામ્ ।
ન વો વિજ્ઞાસ્યતે કશ્ચિત્ત્રિષુ લોકેષુ ભારત ॥ ૧૭॥

વર્ષં ત્રયોદશં ચેદં મત્પ્રસાદાત્કુરૂર્વહાઃ ।

વિરાટનગરે ગૂઢા અવિજ્ઞાતાશ્ચરિષ્યથ ॥ ૧૮॥

યદ્વઃ સઙ્કલ્પિતં રૂપં મનસા યસ્ય યાદૃશમ્ ।
તાદૃશં તાદૃશં સર્વે છન્દતો ધારયિષ્યથ ॥ ૧૯॥

અરિણી સહિતં ચેદં બ્રાહ્મણાય પ્રયચ્છત ।
જિજ્ઞાસાર્થં મયા હ્યેતદાહૃતં મૃગરૂપિણા ॥ ૨૦॥

તૃતીયં ગૃહ્યતાં પુત્ર વરમપ્રતિમં મહત્ ।
ત્વં હિ મત્પ્રભવો રાજન્વિદુરશ્ચ મમાંશ ભાક્ ॥ ૨૧॥

યુધિષ્ઠિર ઉવાચ ।

દેવદેવો મયા દૃષ્ટો ભવાન્સાક્ષાત્સનાતનઃ ।
યં દદાસિ વરં તુષ્ટસ્તં ગ્રહીષ્યામ્યહં પિતઃ ॥ ૨૨॥

જયેયં લોભમોહૌ ચ ક્રોધં ચાહં સદા વિભો ।
દાને તપસિ સત્યે ચ મનો મે સતતં ભવેત્ ॥ ૨૩॥

ધર્મ ઉવાચ ।

ઉપપન્નો ગુણૈઃ સર્વૈઃ સ્વભાવેનાસિ પાણ્ડવ ।
ભવાન્ધર્મઃ પુનશ્ચૈવ યથોક્તં તે ભવિષ્યતિ ॥ ૨૪॥

વૈશમ્પાયન ઉવાચ ।

ઇત્યુક્ત્વાન્તર્દધે ધર્મો ભગવાઁલ્લોકભાવનઃ ।
સમેતાઃ પાણ્ડવાશ્ચૈવ સુખસુપ્તા મનસ્વિનઃ ॥ ૨૫॥

અભ્યેત્ય ચાશ્રમં વીરાઃ સર્વ એવ ગતક્લમાઃ ।
આરણેયં દદુસ્તસ્મૈ બ્રાહ્મણાય તપસ્વિને ॥ ૨૬॥

ઇદં સમુત્થાન સમાગમં મહત્
પિતુશ્ચ પુત્રસ્ય ચ કીર્તિવર્ધનમ્ ।
પઠન્નરઃ સ્યાદ્વિજિતેન્દ્રિયો વશી
સપુત્રપૌત્રઃ શતવર્ષ ભાગ્ભવેત્ ॥ ૨૭॥

ન ચાપ્યધર્મે ન સુહૃદ્વિભેદને
પરસ્વહારે પરદારમર્શને ।
કદર્ય ભાવે ન રમેન્મનો સદા
નૃણાં સદાખ્યાનમિદં વિજાનતામ્ ॥ ૨૮॥

૨૯૯

૨૯૫

જનમેજય ઉવાચ ।

એવં હૃતાયાં કૃષ્ણાયાં પ્રાપ્ય ક્લેશમનુત્તમમ્ ।
પ્રતિલભ્ય તતઃ કૃષ્ણાં કિમકુર્વન્ત પાણ્ડવાઃ ॥ ૧॥

વૈશમ્પાયન ઉવાચ ।

એવં હૃતાયાં કૃષ્ણાયાં પ્રાપ્ય ક્લેશમનુત્તમમ્ ।
વિહાય કામ્યકં રાજા સહ ભ્રાતૃભિરચ્યુતઃ ॥ ૨॥

પુનર્દ્વૈતવનં રમ્યમાજગામ યુધિષ્ઠિરઃ ।
સ્વાદુમૂલફલં રમ્યં માર્કણ્ડેયાશ્રમં પ્રતિ ॥ ૩॥

અનુગુપ્ત ફલાહારાઃ સર્વ એવ મિતાશનાઃ ।
ન્યવસન્પાણ્ડવાસ્તત્ર કૃષ્ણયા સહ ભારત ॥ ૪॥

વસન્દ્વૈતવને રાજા કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ભીમસેનોઽર્જુનશ્ચૈવ માદ્રીપુત્રૌ ચ પાણ્ડવૌ ॥ ૫॥

બ્રાહ્મણાર્થે પરાક્રાન્તા ધર્માત્માનો યતવ્રતાઃ ।
ક્લેશમાર્ચ્છન્ત વિપુલં સુખોદર્કં પરન્તપાઃ ॥ ૬॥

અજાતશત્રુમાસીનં ભ્રતૃભિઃ સહિતં વને ।
આગમ્ય બ્રાહ્મણસ્તૂર્ણં સન્તપ્ત ઇદમબ્રવીત્ ॥ ૭॥

અરણી સહિતં મહ્યં સમાસક્તં વનસ્પતૌ ।
મૃગસ્ય ઘર્ષમાણસ્ય વિષાણે સમસજ્જત ॥ ૮॥

તદાદાય ગતો રાજંસ્ત્વરમાણો મહામૃગઃ ।
આશ્રમાત્ત્વરિતઃ શીઘ્રં પ્લવમાનો મહાજવઃ ॥ ૯॥

તસ્ય ગત્વા પદં શીઘ્રમાસાદ્ય ચ મહામૃગમ્ ।
અગ્નિહોત્રં ન લુપ્યેત તદાનયત પાણ્ડવાઃ ॥ ૧૦॥

બ્રાહ્મણસ્ય વચો શ્રુત્વા સન્તપ્તોઽથ યુધિષ્ઠિરઃ ।
ધનુરાદાય કૌન્તેયઃ પ્રાદ્રવદ્ભ્રાતૃભિઃ સહ ॥ ૧૧॥

સન્નદ્ધા ધન્વિનઃ સર્વે પ્રાદ્રવન્નરપુઙ્ગવાઃ ।
બ્રાહ્મણાર્થે યતન્તસ્તે શીઘ્રમન્વગમન્મૃગમ્ ॥ ૧૨॥

કર્ણિનાલીકનારાચાનુત્સૃજન્તો મહારથાઃ ।
નાવિધ્યન્પાણ્ડવાસ્તત્ર પશ્યન્તો મૃગમન્તિકાત્ ॥ ૧૩॥

તેષાં પ્રયતમાનાનાં નાદૃશ્યત મહામૃગઃ ।
અપશ્યન્તો મૃગં શ્રાન્તા દુઃખં પ્રાપ્તા મનસ્વિનઃ ॥ ૧૪॥

શીતલછાયમાસાદ્ય ન્યગ્રોધં ગહને વને ।
ક્ષુત્પિપાસાપરીતાઙ્ગાઃ પાણ્ડવાઃ સમુપાવિશન્ ॥ ૧૫॥

તેષાં સમુપવિષ્ટાનાં નકુલો દુઃખિતસ્તદા ।
અબ્રવીદ્ભ્રાતરં જ્યેષ્ઠમમર્ષાત્કુરુસત્તમ ॥ ૧૬॥

નાસ્મિન્કુલે જાતુ મમજ્જ ધર્મો
ન ચાલસ્યાદર્થલોપો બભૂવ ।
અનુત્તરાઃ સર્વભૂતેષુ ભૂયઃ
સમ્પ્રાપ્તાઃ સ્મઃ સંશયં કેન રાજન્ ॥ ૧૭॥

---

૨૯૬

યુધિષ્ઠિર ઉવાચ ।

નાપદામસ્તિ મર્યાદા ન નિમિત્તં ન કારણમ્ ।
ધર્મસ્તુ વિભજત્યત્ર ઉભયોઃ પુણ્યપાપયોઃ ॥ ૧॥

ભીમ ઉવાચ ।

પ્રાતિકામ્યનયત્કૃષ્ણાં સભાયાં પ્રેષ્યવત્તદા ।
ન મયા નિહતસ્તત્ર તેન પ્રાપ્તાઃ સ્મ સંશયમ્ ॥ ૨॥

અર્જુન ઉવાચ ।

વાચસ્તીક્ષ્ણાસ્થિ ભેદિન્યઃ સૂતપુત્રેણ ભાષિતાઃ ।
અતિતીક્ષ્ણા મયા ક્ષાન્તાસ્તેન પ્રાપ્તઃ સ્મ સંશયમ્ ॥ ૩॥

સહદેવ ઉવાચા ।

શકુનિસ્ત્વાં યદાજૈષીદક્ષદ્યૂતેન ભારત ।
સ મયા ન હતસ્તત્ર તેન પ્રાપ્તાઃ સ્મ સંશયમ્ ॥ ૪॥

વૈશમ્પાયન ઉવાચ ।

તતો યુધિષ્ઠિરો રાજા નકુલં વાક્યમબ્રવીત્ ।
આરુહ્ય વૃક્ષં માદ્રેય નિરીક્ષસ્વ દિશો દશ ॥ ૫॥

પાનીયમન્તિકે પશ્ય વૃક્ષાન્વાપ્યુદકાશ્રયાન્ ।
ઇમે હિ ભ્રાતરઃ શ્રાન્તાસ્તવ તાત પિપાસિતાઃ ॥ ૬॥

નકુલસ્તુ તથેત્યુક્ત્વા શીઘ્રમારુહ્ય પાદમમ્ ।
અબ્રવીદ્ભ્રાતરં જ્યેષ્ઠમભિવીક્ષ્ય સમન્તતઃ ॥ ૭॥

પશ્યામિ બહુલાન્રાજન્વૃક્ષાનુદકસંશ્રયાન્ ।
સારસાનાં ચ નિર્હ્રાદમત્રોદકમસંશયમ્ ॥ ૮॥

તતોઽબ્રવીત્સત્યધૃતિઃ કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ગચ્છ સૌમ્ય તતઃ શીઘ્રં તૂર્ણં પાનીયમાનય ॥ ૯॥

નકુલસ્તુ તથેત્યુક્ત્વા ભ્રાતુર્જ્યેષ્ઠસ્ય શાસનાત્ ।
પ્રાદ્રવદ્યત્ર પાનીયં શીઘ્રં ચૈવાન્વપદ્યત ॥ ૧૦॥

સ દૃષ્ટ્વા વિમલં તોયં સારસૈઃ પરિવારિતમ્ ।
પાતુ કાકસ્તતો વાચમન્તરિક્ષાત્સ શુશ્રુવે ॥ ૧૧॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ માદ્રેય તતઃ પિબ હરસ્વ ચ ॥ ૧૨॥

અનાદૃત્ય તુ તદ્વાક્યં નકુલઃ સુપિપાસિતઃ ।
અપિબચ્છીતલં તોયં પીત્વા ચ નિપપાત હ ॥ ૧૩॥

ચિરાયમાણે નકુલે કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
અબ્રવીદ્ભ્રાતરં વીરં સહદેવમરિન્દમમ્ ॥ ૧૪॥

ભ્રાતા ચિરાયતે તાત સહદેવ તવાગ્રજઃ ।
તં ચૈવાનય સોદર્યં પાનીયં ચ ત્વમાનય ॥ ૧૫॥

સહદેવસ્તથેત્યુક્ત્વા તાં દિશં પ્રત્યપદ્યત ।
દદર્શ ચ હતં ભૂમૌ ભ્રાતરં નકુલં તદા ॥ ૧૬॥

ભ્રાતૃશોકાભિસન્તપ્તસ્તૃષયા ચ પ્રપીડિતઃ ।
અભિદુદ્રાવ પાનીયં તતો વાગભ્યભાષત ॥ ૧૭॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા યથાકામં તતઃ પિબ હરસ્વ ચ ॥ ૧૮॥

અનાદૃત્ય તુ તદ્વાક્યં સહદેવઃ પિપાસિતઃ ।
અપિબચ્છીતલં તોયં પીત્વા ચ નિપપાત હ ॥ ૧૯॥

અથાબ્રવીત્સ વિજયં કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
ભ્રાતરૌ તે ચિરગતૌ બીભત્સો શત્રુકર્શન ।
તૌ ચૈવાનય ભદ્રં તે પાનીયં ચ ત્વમાનય ॥ ૨૦॥

એવમુક્તો ગુડાકેશઃ પ્રગૃહ્ય સશરં ધનુઃ ।
આમુક્તખડ્ગો મેધાવી તત્સરો પ્રત્યપદ્યત ॥ ૨૧॥

યતઃ પુરુષશાર્દૂલૌ પાનીય હરણે ગતુ ।
તૌ દદર્શ હતૌ તત્ર ભ્રાતરૌ શ્વેતવાહનઃ ॥ ૨૨॥

પ્રસુપ્તાવિવ તૌ દૃષ્ટ્વા નરસિંહઃ સુદુઃખિતઃ ।
ધનુરુદ્યમ્ય કૌન્તેયો વ્યલોકયત તદ્વનમ્ ॥ ૨૩॥

નાપશ્યત્તત્ર કિં ચિત્સ ભૂતં તસ્મિન્મહાવને ।
સવ્યસાચી તતઃ શ્રાન્તઃ પાનીયં સોઽભ્યધાવત ॥ ૨૪॥

અભિધાવંસ્તતો વાચમન્તરિક્ષાત્સ શુશ્રુવે ।
કિમાસીદસિ પાનીયં નૈતચ્છક્યં બલાત્ત્વયા ॥ ૨૫॥

કૌન્તેય યદિ વૈશમ્પાયન ઉવાચ । પ્રશ્નાન્મયોક્તાન્પ્રતિપત્સ્યસે ।
તતઃ પાસ્યસિ પાનીયં હરિષ્યસિ ચ ભારત ॥ ૨૬॥

વારિતસ્ત્વબ્રવીત્પાર્થો દૃશ્યમાનો નિવારય ।
યાવદ્બાણૈર્વિનિર્ભિન્નઃ પુનર્નૈવં વદિષ્યસિ ॥ ૨૭॥

એવમુક્ત્વા તતઃ પાર્થઃ શરૈરસ્ત્રાનુમન્ત્રિતૈઃ ।

વવર્ષ તાં દિશં કૃત્સ્નાં શબ્દવેધં ચ દર્શયન્ ॥ ૨૮॥

કર્ણિનાલીકનારાચાનુત્સૃજન્ભરતર્ષભ ।
અનેકૈરિષુસઙ્ઘાતૈરન્તરિક્ષં વવર્ષ હ ॥ ૨૯॥

યક્ષ ઉવાચ ।

કિં વિઘાતેન તે પાર્થ પ્રશ્નાનુક્ત્વા તતઃ પિબ ।
અનુક્ત્વા તુ તતઃ પ્રશ્નાન્પીત્વૈવ ન ભવિષ્યસિ ॥ ૩૦॥

વૈશમ્પાયન ઉવાચ ।

સ ત્વમોઘાનિષૂન્મુક્ત્વા તૃષ્ણયાભિપ્રપીડિતઃ ।
અવિજ્ઞાયૈવ તાન્પ્રશ્નાન્પીત્વૈવ નિપપાત હ ॥ ૩૧॥

અથાબ્રવીદ્ભીમસેનં કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
નકુલઃ સહદેવશ્ચ બીભત્સુશ્ચાપરાજિતઃ ॥ ૩૨॥

ચિરં ગતાસ્તોયહેતોર્ન ચાગચ્છન્તિ ભારત ।
તાંશ્ચૈવાનય ભદ્રં તે પાનીયં ચ ત્વમાનય ॥ ૩૩॥

ભીમસેનસ્તથેત્યુક્ત્વા તાં દિશં પત્યપદ્યત ।
યત્ર તે પુરુષવ્યાઘ્રા ભ્રાતરોઽસ્ય નિપાતિતાઃ ॥ ૩૪॥

તાન્દૃષ્ટ્વા દુઃખિતો ભીમસ્તૃષયા ચ પ્રપીડિતઃ ।
અમન્યત મહાબાહુઃ કર્મ તદ્યક્ષરક્ષસામ્ ।
સ ચિન્તયામાસ તદા યોદ્ધવ્યં ધ્રુવમદ્ય મે ॥ ૩૫॥

પાસ્યામિ તાવત્પાનીયમિતિ પાર્થો વૃકોદરઃ ।
તતોઽભ્યધાવત્પાનીયં પિપાસુઃ પુરુષર્ષભઃ ॥ ૩૬॥

યક્ષ ઉવાચ ।

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૩૭॥

વૈશમ્પાયન ઉવાચ ।

એવમુક્તસ્તતો ભીમો યક્ષેણામિત તેજસા ।
અવિજ્ઞાયૈવ તાન્પ્રશ્નાન્પીત્વૈવ નિપપાત હ ॥ ૩૮॥

તતઃ કુન્તીસુતો રાજા વિચિન્ત્ય પુરુષર્ષભઃ ।

સમુત્થાય મહાબાહુર્દહ્યમાનેન ચેતસા ॥ ૩૯॥

અપેતજનનિર્ઘોષં પ્રવિવેશ મહાવનમ્ ।
રુરુભિશ્ચ વરાહૈશ્ચ પક્ષિભિશ્ચ નિષેવિતમ્ ॥ ૪૦॥

નીલભાસ્વરવર્ણૈશ્ચ પાદપૈરુપશોભિતમ્ ।
ભ્રમરૈરુપગીતં ચ પક્ષિભિશ્ચ મહાયશઃ ॥ ૪૧॥

સ ગચ્છન્કાનને તસ્મિન્હેમજાલપરિષ્કૃતમ્ ।
દદર્શ તત્સરો શ્રીમાન્વિશ્વકર્મ કૃતં યથા ॥ ૪૨॥

ઉપેતં નલિની જાલૈઃ સિન્ધુવારૈશ્ચ વેતસૈઃ ।
કેતકૈઃ કરવીરૈશ્ચ પિપ્પલૈશ્ચૈવ સંવૃતમ્ ।
શ્રમાર્તસ્તદુપાગમ્ય સરો દૃષ્ટ્વાથ વિસ્મિતઃ ॥ ૪૩॥

---

## ૨૯૭

વૈશમ્પાયન ઉવાચ ।

સ દદર્શ હતાન્ભ્રાતૄઁલ્લોકપાલાનિવ ચ્યુતાન્ ।
યુગાન્તે સમનુપ્રાપ્તે શક્ર પ્રતિમગૌરવાન્ ॥ ૧॥

વિપ્રકીર્ણધનુર્બાણં દૃષ્ટ્વા નિહતમર્જુનમ્ ।
ભીમસેનં યમૌ ચોભૌ નિર્વિચેષ્ટાન્ગતાયુરઃ ॥ ૨॥

સ દીર્ઘમુષ્ણં નિઃશ્વસ્ય શોકબાષ્પપરિપ્લુતઃ ।
બુદ્ધ્યા વિચિન્તયામાસ વીરાઃ કેન નિપાતિતાઃ ॥ ૩॥

નૈષાં શસ્ત્રપ્રહારોઽસ્તિ પદં નેહાસ્તિ કસ્ય ચિત્ ।
ભૂતં મહદિદં મન્યે ભ્રાતરો યેન મે હતાઃ ।
એકાગ્રં ચિન્તયિષ્યામિ પીત્વા વેત્સ્યામિ વા જલમ્ ॥ ૪॥

સ્યાત્તુ દુર્યોધનેનેદમુપાંશુ વિહિતં કૃતમ્ ।
ગન્ધાર રાજરચિતં સતતં જિહ્મબુદ્ધિના ॥ ૫॥

યસ્ય કાર્યમકાર્યં વા સમમેવ ભવત્યુત ।
કસ્તસ્ય વિશ્વસેદ્વીરો દુર્મતેરકૃતાત્મનઃ ॥ ૬॥

અથ વા પુરુષૈર્ગૂઢૈઃ પ્રયોગોઽયં દુરાત્મનઃ ।
ભવેદિતિ મહાબાહુર્બહુધા સમચિન્તયત્ ॥ ૭॥

તસ્યાસીન્ન વિષેણેદમુદકં દૂષિતં યથા ।
મુખવર્ણાઃ પ્રસન્ના મે ભ્રાતૃણાં ઇત્યચિન્તયત્ ॥ ૮॥

એકૈકશશ્ચૌઘબલાનિમાન્પુરુષસત્તમાન્ ।
કોઽન્યઃ પ્રતિસમાસેત કાલાન્તકયમાદૃતે ॥ ૯॥

એતેનાધ્યવસાયેન તત્તોયમવગાઢવાન્ ।
ગાહમાનશ્ચ તત્તોયમન્તરિક્ષાત્સ શુશ્રુવે ॥ ૧૦॥

યક્ષ ઉવાચ ।

અહં બકઃ શૈવલમત્સ્યભક્ષો
મયા નીતાઃ પ્રેતવશં તવાનુજાઃ ।
ત્વં પઞ્ચમો ભવિતા રાજપુત્ર
ન ચેત્પ્રશ્નાન્પૃચ્છતો વ્યાકરોષિ ॥ ૧૧॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૧૨॥

યુધિષ્ઠિર ઉવાચ ।

રુદ્રાણાં વા વસૂનાં વા મરુતાં વા પ્રધાનભાક્ ।
પૃચ્છામિ કો ભવાન્દેવો નૈતચ્છકુનિના કૃતમ્ ॥ ૧૩॥

હિમવાન્પારિયાત્રશ્ ચ વિન્ધ્યો મલય એવ ચ ।
ચત્વારઃ પર્વતાઃ કેન પાતિતા ભુવિ તેજસા ॥ ૧૪॥

અતીવ તે મહત્કર્મકૃતં બલવતાં વર ।
યન્ન દેવા ન ગન્ધર્વા નાસુરા ન ચ રાક્ષસાઃ ।
વિષહેરન્મહાયુદ્ધે કૃતં તે તન્મહાદ્ભુતમ્ ॥ ૧૫॥

ન તે જાનામિ યત્કાર્યં નાભિજાનામિ કાઙ્ક્ષિતમ્ ।
કૌતૂહલં મહજ્જાતં સાધ્વસં ચાગતં મમ ॥ ૧૬॥

યેનાસ્મ્યુદ્વિગ્નહૃદયઃ સમુત્પન્ન શિરો જ્વરઃ ।
પૃચ્છામિ ભગવંસ્તસ્માત્કો ભવાનિહ તિષ્ઠતિ ॥ ૧૭॥

યક્ષ ઉવાચ ।

યક્ષોઽહમસ્મિ ભદ્રં તે નાસ્મિ પક્ષી જલે ચરઃ ।
મયૈતે નિહતાઃ સર્વે ભ્રાતરસ્તે મહૌજસઃ ॥ ૧૮॥

વૈશમ્પાયન ઉવાચ ।

તતસ્તામશિવાં શ્રુત્વા વાચં સ પરુષાક્ષરામ્ ।
યક્ષસ્ય બ્રુવતો રાજન્નુપક્રમ્ય તદા સ્થિતઃ ॥ ૧૯॥

વિરૂપાક્ષં મહાકાયં યક્ષં તાલસમુચ્છ્રયમ્ ।
જ્વલનાર્કપ્રતીકાશમધૃષ્યં પર્વતોપમમ્ ॥ ૨૦॥

સેતુમાશ્રિત્ય તિષ્ઠન્તં દદર્શ ભરતર્ષભઃ ।
મેઘગમ્ભીરયા વાચા તર્જયન્તં મહાબલમ્ ॥ ૨૧॥

યક્ષ ઉવાચ ।

ઇમે તે ભ્રાતરો રાજન્વાર્યમાણા મયાસકૃત્ ।
બલાત્તોયં જિહીર્ષન્તસ્તતો વૈશમ્પાયન ઉવાચ । સૂદિતા મયા ॥ ૨૨॥

ન પેયમુદકં રાજન્પ્રાણાનિહ પરીપ્સતા ।
પાર્થ મા સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૨૩॥

યુધિષ્ઠિર ઉવાચ ।

નૈવાહં કામયે યક્ષ તવ પૂર્વપરિગ્રહમ્ ।
કામનૈતત્પ્રશંસન્તિ સન્તો હિ પુરુષાઃ સદા ॥ ૨૪॥

યદાત્મના સ્વમાત્માનં પ્રશંસેત્પુરુષઃ પ્રભો ।
યથા પ્રજ્ઞં તુ તે પ્રશ્નાન્પ્રતિવક્ષ્યામિ પૃચ્છ મામ્ ॥ ૨૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદાદિત્યમુન્નયતિ કેચ તસ્યાભિતશ્ચરાઃ ।
કશ્ચૈનમસ્તં નયતિ કસ્મિંશ્ચ પ્રતિતિષ્ઠતિ ॥ ૨૬॥

યુધિષ્ઠિર ઉવાચ ।

બ્રહ્માદિત્યમુન્નયતિ દેવાસ્તસ્યાભિતશ્ચરાઃ ।
ધર્મશ્ચાસ્તં નયતિ ચ સત્યે ચ પ્રતિતિષ્ઠતિ ॥ ૨૭॥

યક્ષ ઉવાચ ।

કેન સ્વિચ્છ્રોત્રિયો ભવતિ કેન સ્વિદ્વિન્દતે મહત્ ।
કેન દ્વિતીયવાન્ભવતિ રાજન્કેન ચ બુદ્ધિમાન્ ॥ ૨૮॥

યુધિષ્ઠિર ઉવાચ ।

શ્રુતેન શ્રોત્રિયો ભવતિ તપસા વિન્દતે મહત્ ।
ધૃત્યા દ્વિતીયવાન્ભવતિ બુદ્ધિમાન્વૃદ્ધસેવયા ॥ ૨૯॥

યક્ષ ઉવાચ ।

કિં બ્રાહ્મણાનાં દેવત્વં કશ્ચ ધર્મઃ સતાં ઇવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતાં ઇવ ॥ ૩૦॥

યુધિષ્ઠિર ઉવાચ ।

સ્વાધ્યાય એષાં દેવત્વં તપ એષાં સતાં ઇવ ।
મરણં માનુષો ભાવઃ પરિવાદોઽસતાં ઇવ ॥ ૩૧॥

યક્ષ ઉવાચ ।

કિં ક્ષત્રિયાણાં દેવત્વં કશ્ચ ધર્મઃ સતાં ઇવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતાં ઇવ ॥ ૩૨॥

યુધિષ્ઠિર ઉવાચ ।

ઇષ્વસ્ત્રમેષાં દેવત્વં યજ્ઞ એષાં સતાં ઇવ ।
ભયં વૈશમ્પાયન ઉવાચ । માનુષો ભાવઃ પરિત્યાગોઽસતાં ઇવ ॥ ૩૩॥

યક્ષ ઉવાચ ।

કિમેકં યજ્ઞિયં સામ કિમેકં યજ્ઞિયં યજુઃ ।
કા ચૈકા વૃશ્ચતે યજ્ઞં કાં યજ્ઞો નાતિવર્તતે ॥ ૩૪॥

યુધિષ્ઠિર ઉવાચ ।

પ્રાણો વૈશમ્પાયન ઉવાચ । યજ્ઞિયં સામ મનો વૈ યજ્ઞિયં યજુઃ ।
વાગેકા વૃશ્ચતે યજ્ઞં તાં યજ્ઞો નાતિવર્તતે ॥ ૩૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદાપતતાં શ્રેષ્ઠં બીજં નિપતતાં વરમ્ ।

કિં સ્વિત્પ્રતિષ્ઠમાનાનાં કિં સ્વિત્પ્રવદતાં વરમ્ ॥ ૩૬॥

યુધિષ્ઠિર ઉવાચ ।

વર્ષમાપતતાં શ્રેષ્ઠં બીજં નિપતતાં વરમ્ ।
ગાવઃ પ્રતિષ્ઠમાનાનાં પુત્રઃ પ્રવદતાં વરઃ ॥ ૩૭॥

યક્ષ ઉવાચ ।

ઇન્દ્રિયાર્થાનનુભવન્બુદ્ધિમાઁલ્લોકપૂજિતઃ ।
સંમતઃ સર્વભૂતાનામુચ્છ્વસન્કો ન જીવતિ ॥ ૩૮॥

યુધિષ્ઠિર ઉવાચ ।

દેવતાતિથિભૃત્યાનાં પિતૃણામાત્મનશ્ચ યઃ ।
ન નિર્વપતિ પઞ્ચાનામુચ્છ્વસન્ન સ જીવતિ ॥ ૩૯॥

યક્ષ ઉવાચ ।

કિં સ્વિદ્ગુરુતરં ભૂમેઃ કિં સ્વિદુચ્ચતરં ચ ખાત્ ।
કિં સ્વિચ્છીઘ્રતરં વાયોઃ કિં સ્વિદ્બહુતરં નૃણામ્ ॥ ૪૦॥

યુધિષ્ઠિર ઉવાચ ।

માતા ગુરુતરા ભૂમેઃ પિતા ઉચ્ચતરશ્ચ ખાત્ ।
મનો શીઘ્રતરં વાયોશ્ચિન્તા બહુતરી નૃણામ્ ॥ ૪૧॥

યક્ષ ઉવાચ ।

કિં સ્વિત્સુપ્તં ન નિમિષતિ કિં સ્વિજ્જાતં ન ચોપતિ ।
કસ્ય સ્વિદ્ધૃદયં નાસ્તિ કિં સ્વિદ્વેગેન વર્ધતે ॥ ૪૨॥

યુધિષ્ઠિર ઉવાચ ।

મત્સ્યઃ સુપ્તો ન નિમિષત્યણ્ડં જાતં ન ચોપતિ ।
અશ્મનો હૃદયં નાસ્તિ નદીવેગેન વર્ધતે ॥ ૪૩॥

યક્ષ ઉવાચ ।

કિં સ્વિત્પ્રવસતો મિત્રં કિં સ્વિન્મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ચ કિં મિત્રં કિં સ્વિન્મિત્રં મરિષ્યતઃ ॥ ૪૪॥

યુધિષ્ઠિર ઉવાચ ।

સાર્થઃ પ્રવસતો મિત્રં ભાર્યા મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ભિષન્મિત્રં દાનં મિત્રં મરિષ્યતઃ ॥ ૪૫॥

યક્ષ ઉવાચ ।

કિં સ્વિદેકો વિચરતિ જાતઃ કો જાયતે પુનઃ ।
કિં સ્વિદ્ધિમસ્ય ભૈષજ્યં કિં સ્વિદાવપનં મહત્ ॥ ૪૬॥

યુધિષ્ઠિર ઉવાચ ।

સૂર્ય એકો વિચરતિ ચન્દ્રમા જાયતે પુનઃ ।
અગ્નિર્હિમસ્ય ભૈષજ્યં ભૂમિરાપવનં મહત્ ॥ ૪૭॥

યક્ષ ઉવાચ ।

કિં સ્વિદેકપદં ધર્મ્યં કિં સ્વિદેકપદં યશઃ ।
કિં સ્વિદેકપદં સ્વર્ગ્યં કિં સ્વિદેકપદં સુખમ્ ॥ ૪૮॥

યુધિષ્ઠિર ઉવાચ ।

દાક્ષ્યમેકપદં ધર્મ્યં દાનમેકપદં યશઃ ।
સત્યમેકપદં સ્વર્ગ્યં શીલમેકપદં સુખમ્ ॥ ૪૯॥

યક્ષ ઉવાચ ।

કિં સ્વિદાત્મા મનુષ્યસ્ય કિં સ્વિદ્દૈવકૃતઃ સખા ।
ઉપજીવનં કિં સ્વિદસ્ય કિં સ્વિદસ્ય પરાયણમ્ ॥ ૫૦॥

યુધિષ્ઠિર ઉવાચ ।

પુત્ર આત્મા મનુષ્યસ્ય ભાર્યા દૈવકૃતઃ સખા ।
ઉપજીવનં ચ પર્જન્યો દાનમસ્ય પરાયણમ્ ॥ ૫૧॥

યક્ષ ઉવાચ ।

ધન્યાનામુત્તમં કિં સ્વિદ્ધનાનાં કિં સ્વિદુત્તમમ્ ।
લાભાનામુત્તમં કિં સ્વિત્કિં સુખાનાં તથોત્તમમ્ ॥ ૫૨॥

યુધિષ્ઠિર ઉવાચ ।

ધન્યાનામુત્તમં દાક્ષ્યં ધનાનામુત્તમં શ્રુતમ્ ।
લાભાનાં શ્રેષ્ઠમારોગ્યં સુખાનાં તુષ્ટિરુત્તમા ॥ ૫૩॥

યક્ષ ઉવાચ ।

કશ્ચ ધર્મઃ પરો લોકે કશ્ચ ધર્મઃ સદા ફલઃ ।
કિં નિયમ્ય ન શોચન્તિ કૈશ્ચ સન્ધિર્ન જીર્યતે ॥ ૫૪॥

યુધિષ્ઠિર ઉવાચ ।

આનૃશંસ્યં પરો ધર્મસ્ત્રયીધર્મઃ સદા ફલઃ ।
અનો યમ્ય ન શોચન્તિ સદ્ભિઃ સન્ધિર્ન જીર્યતે ॥ ૫૫॥

યક્ષ ઉવાચ ।

કિં નુ હિત્વા પ્રિયો ભવતિ કિં નુ હિત્વા ન શોચતિ ।
કિં નુ હિત્વાર્થવાન્ભવતિ કિં નુ હિત્વા સુખી ભવેત્ ॥ ૫૬॥

યુધિષ્ઠિર ઉવાચ ।

માનં હિત્વા પ્રિયો ભવતિ ક્રોધં હિત્વા ન શોચતિ ।
કામં હિત્વાર્થવાન્ભવતિ લોભં હિત્વા સુખૂ ભવેત્ ॥ ૫૭॥

યક્ષ ઉવાચ ।

મૃતં કથં સ્યાત્પુરુષઃ કથં રાષ્ટ્રં મૃતં ભવેત્ ।
શ્રાધં મૃતં કથં ચ સ્યાત્કથં યજ્ઞો મૃતો ભવેત્ ॥ ૫૮॥

યુધિષ્ઠિર ઉવાચ ।

મૃતો દરિદ્રઃ પુરુષો મૃતં રાષ્ટ્રમરાજકમ્ ।
મૃતમશ્રોત્રિયં શ્રાદ્ધં મૃતો યજ્ઞો ત્વદક્ષિણઃ ॥ ૫૯॥

યક્ષ ઉવાચ ।

કા દિક્કિમુદકં પ્રોક્તં કિમન્નં પાર્થ કિં વિષમ્ ।
શ્રાદ્ધસ્ય કાલમાખ્યાહિ તતઃ પિબ હરસ્વ ચ ॥ ૬૦॥

યુધિષ્ઠિર ઉવાચ ।

સન્તો દિગ્જલમાકાશં ગૌરન્નં પ્રાર્થના વિષમ્ ।
શ્રાદ્ધસ્ય બ્રાહ્મણઃ કાલઃ કથં વા યક્ષ મન્યસે ॥ ૬૧॥

યક્ષ ઉવાચ ।

વ્યાખ્યાતા મે ત્વયા પ્રશ્ના યાથાતથ્યં પરન્તપ ।

પુરુષં ત્વિદાનીમાખ્યાહિ યશ્ચ સર્વધની નરઃ ॥ ૬૨॥

યુધિષ્ઠિર ઉવાચ ।

દિવં સ્પૃશતિ ભૂમિં ચ શબ્દઃ પુણ્યસ્ય કર્મણઃ ।
યાવત્સ શબ્દો ભવતિ તાવત્પુરુષ ઉચ્યતે ॥ ૬૩॥

તુલ્યે પ્રિયાપ્રિયે યસ્ય સુખદુઃખે તથૈવ ચ ।
અતીતાનાગતે ચોભે સ વૈશમ્પાયન ઉવાચ । સર્વધની નરઃ ॥ ૬૪॥

યક્ષ ઉવાચ ।

વ્યાખ્યાતઃ પુરુષો રાજન્યશ્ચ સર્વધની નરઃ ।
તસ્માત્તવૈકો ભ્રાતૄણાં યમિચ્છસિ સ જીવતુ ॥ ૬૫॥

યુધિષ્ઠિર ઉવાચ ।

શ્યામો ય એષ રક્તાક્ષો બૃહચ્છાલ ઇવોદ્ગતઃ ।
વ્યૂઢોરસ્કો મહાબાહુરઙ્કુલો યક્ષ જીવતુ ॥ ૬૬॥

યક્ષ ઉવાચ ।

પ્રિયસ્તે ભીમસેનોઽયમર્જુનો વઃ પરાયણમ્ ।
સ કસ્માન્નકુલં રાજન્સાપત્નં જીવમિચ્છસિ ॥ ૬૭॥

યસ્ય નાગસહસ્રેણ દશ સઙ્ખ્યેન વૈશમ્પાયન ઉવાચ । બલમ્ ।
તુલ્યં તં ભીમમુત્સૃજ્ય નકુલં જીવમિચ્છસિ ॥ ૬૮॥

તથૈનં મનુજાઃ પ્રાહુર્ભીમસેનં પ્રિયં તવ ।
અથ કેનાનુભાવેન સાપત્નં જીવમિચ્છસિ ॥ ૬૯॥

યસ્ય બાહુબલં સર્વે પાણ્ડવાઃ સમુપાશ્રિતાઃ ।
અર્જુનં તમપાહાય નકુલં જીવમિચ્છસિ ॥ ૭૦॥

યુધિષ્ઠિર ઉવાચ ।

આનૃશંસ્ય પરો ધર્મઃ પરમાર્થાચ્ચ મે મતમ્ ।
આનૃશંસ્યં ચિકીર્ષામિ નકુલો યક્ષ જીવતુ ॥ ૭૧॥

ધર્મશીલઃ સદા રાજા ઇતિ માં માનવા વિદુઃ ।
સ્વધર્માન્ન ચલિષ્યામિ નકુલો યક્ષ જીવતુ ॥ ૭૨॥

યથા કુન્તી તથા માદ્રી વિશેષો નાસ્તિ મે તયોઃ ।

માતૃભ્યાં સમમિચ્છામિ નકુલો યક્ષ જીવતુ ॥ ૭૩॥

યક્ષ ઉવાચ ।

યસ્ય તેઽર્થાચ્ચ કામાચ્ચ આનૃશંસ્યં પરં મતમ્ ।
અસ્માત્તે ભ્રાતરઃ સર્વે જીવન્તુ ભરતર્ષભ ॥ ૭૪॥

---

૨૯૮

વૈશમ્પાયન ઉવાચ ।

તતસ્તે યક્ષવચનાદુદતિષ્ઠન્ત પાણ્ડવાઃ ।
ક્ષુત્પિપાસે ચ સર્વેષાં ક્ષણે તસ્મિન્વ્યગચ્છતામ્ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ ।

રસસ્યેકેન પાદેન તિષ્ઠન્તમપરાજિતમ્ ।
પૃચ્છામિ કો ભવાન્દેવો ન મે યક્ષો મતો ભવાન્ ॥ ૨॥

વસૂનાં વા ભવાનેકો રુદ્રાણામથ વા ભવાન્ ।
અથ વા મરુતાં શ્રેષ્ઠો વર્જી વા ત્રિદશેશ્વરઃ ॥ ૩॥

મમ હિ ભ્રાતર ઇમે સહસ્રશતયોધિનઃ ।
ન તં યોગં પ્રપશ્યામિ યેન સ્યુર્વિનિપાતિતાઃ ॥ ૪॥

સુખં પ્રતિવિબુદ્ધાનામિન્દ્રિયાણ્યુપલક્ષયે ।
સ ભવાન્સુહૃદસ્માકમથ વા નઃ પિતા ભવાન્ ॥ ૫॥

યક્ષ ઉવાચ ।

અહં તે જનકસ્તાત ધર્મો મૃદુ પરાક્રમ ।
ત્વાં દિદૃક્ષુરનુપ્રાપ્તો વિદ્ધિ માં ભરતર્ષભ ॥ ૬॥

યશો સત્યં દમઃ શૌચમાર્જવં હ્રીરચાપલમ્ ।
દાનં તપો બ્રહ્મચર્યમિત્યેતાસ્તનવો મમ ॥ ૭॥

અહિંસા સમતા શાન્તિસ્તપો શૌચમમત્સરઃ ।
દ્વારાણ્યેતાનિ મે વિદ્ધિ પ્રિયો હ્યસિ સદા મમ ॥ ૮॥

દિષ્ટ્યા પઞ્ચસુ રક્તોઽસિ દિષ્ટ્યા તે ષટ્પદી જિતા ।

દ્વે પૂર્વે મધ્યમે દ્વે ચ દ્વે ચાન્તે સામ્પરાયિકે ॥ ૯॥

ધર્મોઽહમસ્મિ ભદ્રં તે જિજ્ઞાસુસ્ત્વમિહાગતઃ ।
આનૃશંસ્યેન તુષ્ટોઽસ્મિ વરં દાસ્યામિ તેઽનઘ ॥ ૧૦॥

વરં વૃણીષ્વ રાજેન્દ્ર દાતા હ્યસ્મિ તવાનઘ ।
યે હિ મે પુરુષા ભક્તા ન તેષામસ્તિ દુર્ગતિઃ ॥ ૧૧॥

યુધિષ્ઠિર ઉવાચ ।

અરણી સહિતં યસ્ય મૃગ આદાય ગચ્છતિ ।
તસ્યાગ્નયો ન લુપ્યેરન્પ્રથમોઽસ્તુ વરો મમ ॥ ૧૨॥

ધર્મ ઉવાચ ।

અરણી સહિતં તસ્ય બ્રાહ્મણસ્ય હૃતં મયા ।
મૃગવેષેણ કૌન્તેય જિજ્ઞાસાર્થં તવ પ્રભો ॥ ૧૩॥

વૈશમ્પાયન ઉવાચ ।

દદાનીત્યેવ ભવગાનુત્તરં પ્રત્યપદ્યત ।
અન્યં વરય ભદ્રં તે વરં ત્વમમરોપમ ॥ ૧૪॥

યુધિષ્ઠિર ઉવાચ ।

વર્ષાણિ દ્વાદશારણ્યે ત્રયોદશમુપસ્થિતમ્ ।
તત્ર નો નાભિજાનીયુર્વસતો મનુજાઃ ક્વ ચિત્ ॥ ૧૫॥

વૈશમ્પાયન ઉવાચ ।

દદાનીત્યેવ ભગવાનુત્તરં પ્રત્યપદ્યત ।
ભૂયો ચાશ્વાસયામાસ કૌન્તેયં સત્યવિક્રમમ્ ॥ ૧૬॥

યદ્યપિ સ્વેન રૂપેણ ચરિષ્યથ મહીમિમામ્ ।
ન વો વિજ્ઞાસ્યતે કશ્ચિત્ત્રિષુ લોકેષુ ભારત ॥ ૧૭॥

વર્ષં ત્રયોદશં ચેદં મત્પ્રસાદાત્કુરૂર્વહાઃ ।
વિરાટનગરે ગૂઢા અવિજ્ઞાતાશ્ચરિષ્યથ ॥ ૧૮॥

યદ્વઃ સઙ્કલ્પિતં રૂપં મનસા યસ્ય યાદૃશમ્ ।
તાદૃશં તાદૃશં સર્વે છન્દતો ધારયિષ્યથ ॥ ૧૯॥

અરિણી સહિતં ચેદં બ્રાહ્મણાય પ્રયચ્છત ।

જિજ્ઞાસાર્થં મયા હ્યેતદાહૃતં મૃગરૂપિણા ॥ ૨૦॥

તૃતીયં ગૃહ્યતાં પુત્ર વરમપ્રતિમં મહત્ ।
ત્વં હિ મત્પ્રભવો રાજન્વિદુરશ્ચ મમાંશ ભાક્ ॥ ૨૧॥

યુધિષ્ઠિર ઉવાચ ।

દેવદેવો મયા દૃષ્ટો ભવાન્સાક્ષાત્સનાતનઃ ।
યં દદાસિ વરં તુષ્ટસ્તં ગ્રહીષ્યામ્યહં પિતઃ ॥ ૨૨॥

જયેયં લોભમોહૌ ચ ક્રોધં ચાહં સદા વિભો ।
દાને તપસિ સત્યે ચ મનો મે સતતં ભવેત્ ॥ ૨૩॥

ધર્મ ઉવાચ ।

ઉપપન્નો ગુણૈઃ સર્વૈઃ સ્વભાવેનાસિ પાણ્ડવ ।
ભવાન્ધર્મઃ પુનશ્ચૈવ યથોક્તં તે ભવિષ્યતિ ॥ ૨૪॥

વૈશમ્પાયન ઉવાચ ।

ઇત્યુક્ત્વાન્તર્દધે ધર્મો ભગવાઁલ્લોકભાવનઃ ।
સમેતાઃ પાણ્ડવાશ્ચૈવ સુખસુપ્તા મનસ્વિનઃ ॥ ૨૫॥

અભ્યેત્ય ચાશ્રમં વીરાઃ સર્વ એવ ગતક્લમાઃ ।
આરણેયં દદુસ્તસ્મૈ બ્રાહ્મણાય તપસ્વિને ॥ ૨૬॥

ઇદં સમુત્થાન સમાગમં મહત્
પિતુશ્ચ પુત્રસ્ય ચ કીર્તિવર્ધનમ્ ।
પઠન્નરઃ સ્યાદ્વિજિતેન્દ્રિયો વશી
સપુત્રપૌત્રઃ શતવર્ષ ભાગ્ભવેત્ ॥ ૨૭॥

ન ચાપ્યધર્મે ન સુહૃદ્વિભેદને
પરસ્વહારે પરદારમર્શને ।
કદર્ય ભાવે ન રમેન્મનો સદા
નૃણાં સદાખ્યાનમિદં વિજાનતામ્ ॥ ૨૮॥

Proofread by Sunder Hattangadi

*yudhiShThiragItA*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*